# Vireshvara Stuti - 1

# વીરેશ્વરસ્તુતિઃ - ૧

## Document Information

Text title : Vireshvara Stuti - 1

File name : vIreshvarastutiH1.itx

Category : shiva, stuti, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 47| 19-39||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# Vireshvara Stuti - 1

# વીરેશ્વરસ્તુતિઃ - ૧

॥ વીરેશ્વરસ્તુતિઃ - ૧ - ગૌરીમનોરમણભજનસ્તોત્રમ્ ॥

મન્માનસં ભવ ભવચ્ચરણાર્ચનાય તાવત્પ્રસૂનમિદમસ્તુ શરીરમસ્ય ।
ધૂપાય નિત્યમસવોઽપ્યુપહારયોગ્યાઃ ચક્ષૂંષિ દીપકલિકાફલતાં પ્રયાન્તુ ॥ ૧॥

યદ્યન્મદીયમનઘં વસુ ચન્દ્રમૌલે તત્તત્તવૈવ પદપૂજનયોગ્યમસ્તુ ।
સ્વામિન્ ત્રિનેત્ર મમ ગાત્રમિદં પવિત્રં લિઙ્ગાર્ચનાય ભગવન્નનુકૂલમસ્તુ ॥ ૨॥

ધીરૈસ્સહારસુકુમારકુમારદારૈઃ સાકં નિરાકુલમુમારમણાર્ચનેન ।
કાલં નયામિ વિમલૈઃ કમલાવિલાસૈઃ શ્રીકાલકાલ સકલૈઃ સકલૈરલં મે ॥ ૩॥

જન્માનિ સન્તુ શતશોઽથ સહસ્રશો વા કિં તાવતાઽપિ યદિ ભક્તિરુમાસહાયે ।
ધન્યાનિ તાનિ સકલાનિ તદેતિ મન્યે ધન્યં ત્રિલોચનકૃપૈકવિધાનભૂતમ્ ॥ ૪॥

મત્પ્રાર્થનીયમિદમેવ ભવત્પદાબ્જભક્તિર્ભવત્પાદસરોરુહપૂજનાય ।
તેનૈવ મે સકલસિદ્ધિપરમ્પરા સ્યાત્ એતાવદેવ મમ દેયમપિ ત્વયાપિ ॥ ૫॥

ભક્તિર્ભવે પ્રતિભવેઽપિ વિરક્તિરર્થે શક્તિર્ગિરીશનગમનેઽનુરક્તિઃ ।
લિઙ્ગાર્ચને રતિરનઙ્ગહરે પ્રવૃત્તિઃ બિલ્વાર્ચને મતિરુમેશકથાસુ મે સ્યાત્ ॥ ૬॥

અદ્યાવધિ પ્રલયકાલમહાવસાનપર્યન્તમન્તકરિપુત્રિપુરાન્તકાખ્યા ।
નૃત્યં કરોતુ રસનારુચિરાઙ્ગણે મે શ્રીશૂલપાણિચરણે કરવાણિ વાણીમ્ ॥ ૭॥

યાગૈરલં સકલયોગકુલૈરલં મે દાનૈરલં પરિમલૈઃ કમલાવિલાસૈઃ ।
અન્યૈશ્ચ ધર્મનિકરૈઃ સુકરૈરપારે ગૌરીમનોરમણ તે ચરણૌ ભજામિ ॥ ૮॥

ભાગ્યૈરલં બહુવિધૈર્નિધિકોટિભિર્વા માતઙ્ગકોટિભિરલં કમલાવિલાસૈઃ ।
ગોકોટિકોટિભિરલં મહિષીકુલૈર્વા ગૌરીમનોરમણ તે ચરણૌ ભજામિ ॥ ૯॥

ગર્ભેઽર્ભકત્વસમયેઽપિ વિવેકશૂન્યઃ ત્વત્પાદપદ્મવિમુખઃ કુમુખઃ કઠોરઃ ।
તત્તાવદીશકૃપયા ન પુનર્મમાસ્તુ ગૌરીમનોરમણ તે ચરણૌ ભજામિ ॥ ૧૦॥

પૌગણ્ડમણ્ડિતતનુવ્યસનપ્રહર્ષવર્ષાભિયોગમભિભોગમપિ પ્રપદ્ય ।

ભક્ત્યા સ્મૃતોઽપિ ભગવન્ ન મયા જડેન ગૌરીમનોરમણ તે ચરણૌ ભજામિ ॥ ૧૧॥

સોન્માદયૌવનવનોપહતેન તેન નારાધિતોઽસિ ન મનાગપિ કીર્તિતોઽસિ ।
તત્તાવદીશ્વર પુનર્ન મમાસ્તુ માસ્તુ ગૌરીમનોરમણ તે ચરણૌ ભજામિ ॥ ૧૨॥

નારીમનોહરવિહારપરાભિભૂતચિત્તેન તાવદસકૃન્ન નમસ્કૃતોઽસિ ।
તન્માસ્તુ માસ્તુ હર માસ્તુ કદાપિ માસ્તુ ગૌરીમનોરમણ તે ચરણૌ ભજામિ ॥ ૧૩॥

વિત્તાર્જનાય બહુદેશવિનાશદોષવ્યાપારપૂરિતતનુર્ન તદા કદાઽપિ ।
અભ્યર્થિતોઽપિ હિ મયા તદપાસ્યમેવ ગૌરીમનોરમણ તે ચરણૌ ભજામિ ॥ ૧૪॥

દારોરુહારપરિહારવિહારકારકારાનુકારકરણેન વયોઽપિ નીતમ્ ।
તેનાલમેવ હરહારભયાપહારં ગૌરીમનોરમણ તે ચરણૌ ભજામિ ॥ ૧૫॥

હારપ્રવીરપરમાદરતો હરારં હારં સહારમનુવારમપિ સ્મરામિ ।
નાદ્યાપિ હારચિરસઙ્ગતિરાવિરાસીત્ ગૌરીમનોરમણ તે ચરણૌ ભજામિ ॥ ૧૬॥

મારોપકારકશરપ્રવરપ્રહારસંહારભીરુદરુણીચરણોપઘાતૈઃ ।
નીતં દિનં પ્રતિદિનં શમનં ન મેને ગૌરીમનોરમણ તે ચરણૌ ભજામિ ॥ ૧૭॥

સંસારસાગરવિચારવિદૂરગર્તે વૃત્તિર્ન વૃત્તિરપિ હારમનોહરેષુ ।
હારોપહારકરણેઽપિ ન મે પ્રવૃત્તિઃ ગૌરીમનોરમણ તે ચરણૌ ભજામિ ॥ ૧૮॥

મન્દારકુન્દનવબિલ્વદલપ્રવાલવલ્લીદલૈરપિ ન લિઙ્ગસમર્ચનાય ।
યત્નઃ કૃતઃ ક્રતુશતાદિકધર્મજાલૈઃ ગૌરીમનોહરણ તે ચરણૌ ભજામિ ॥ ૧૯॥

અઙ્ગારસાગરશરીરવિકારભાર સંહાર મારહર હારવિચારહીનઃ ।
દૈનન્દિનપ્રલયસંહરણપ્રવીણ ગૌરીમનોહરણ તે ચરણૌ ભજામિ ॥ ૨૦॥

મામેવ મામકધિયા પરિપશ્ય પશ્યકા તાવતાપિ તવ તાત વતાતિહાનિઃ ।
ત્વં દીનબન્ધુરિતિ કિં શ્રુતિષુ શ્રુતોઽપિ ગૌરીમનોહરણ તે ચરણૌ ભજામિ ॥ ૨૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વીરેશ્વરસ્તુતિઃ - ૧ - ગૌરીમનોરમણભજનસ્તોત્રં સમ્પૂર્ણમ્ ॥

બૃહસ્પતિશતાનન્દસંવાદે વીરેશ્વરસ્તુતિવર્ણનં
- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૪૭। ૧૯-૩૯॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 47. 19-39..

Proofread by Ruma Dewan

*Vireshvara Stuti - 1*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*